# श्रीशिवाष्टकं

प्रभुं प्राणनाथं विभुं विश्वनाथं जगन्नाथनाथं सदानन्द भाजम् ।
भवद्भव्य भूतेश्वरं भूतनाथं शिवं शङ्करं शम्भु मीशानमीडे ॥ १॥

गले रुण्डमालं तनौ सर्पजालं महाकालकालं गणेशाधिपालम् ।
जटाजूट गङ्गोत्तरङ्गैः र्विशालं शिवं शङ्करं शम्भु मीशानमीडे ॥ २॥

मुदामाकरं मण्डनं मण्डयन्तं महामण्डलं भस्म भूषाधरं तम् ।
अनादिह्यपारं महामोहमारं शिवं शङ्करं शम्भु मीशानमीडे ॥ ३॥

वटाधो निवासं महाट्टाट्टहासं महापापनाशं सदा सुप्रकाशम् ।
गिरीशं गणेशं सुरेशं महेशं शिवं शङ्करं शम्भु मीशानमीडे ॥ ४॥

गिरिन्द्रात्मजा संग्र हीतार्ध देहं गिरौ संस्थितं सर्वदा पन्नगेहम् ।
परब्रह्म ब्रह्मादिभि र्वन्ध्यमानं शिवं शङ्करं शम्भु मीशानमीडे ॥ ५॥

कपालं त्रिशूलं कराभ्यां दधानं पदाम्भोज नम्राय कामं ददानम् ।
बलीवर्दमानं सुराणां प्रधानं शिवं शङ्करं शम्भु मीशानमीडे ॥ ६॥

शरच्चन्द्रगात्रं गणानन्द पात्रं त्रिनेत्रं पवित्रं धनेशस्य मित्रम् ।
अपर्णा कलत्रं सदा सच्चरित्रं शिवं शङ्करं शम्भु मीशानमीडे ॥ ७॥

हरं सर्पहारं चिता भूविहारं भवं वेदसारं सदा निर्विकारम् ।
श्मशाने वसन्तं मनोजं दहन्तं शिवं शङ्करं शम्भु मीशानमीडे ॥ ८॥

स्वयं यः प्रभाते नरः शूलपाणे पठेत् स्तोत्ररत्नं त्विह प्राप्य रत्नम् ।
सुपुत्रं सुधान्यं सुमित्रं कलत्रं विचित्रैस् समाराध्य मोक्षं प्रयाति ॥ ९॥

॥ इति शिवाष्टकम् ॥